काचं गोकर्णिणीयुतं न हि शुभं चुल्ली च पर्व्वा-
परम् ॥

नामान्यतः सन्ततशान्तिदञ्च
स्याद्वर्द्धमानं त्वथ कुक्कुटाख्यम् ।
हस्त्यादितो नाम चतुष्टयञ्च
हर्म्येर द्विशालं प्रथमं तथैव ॥
यत् स्वस्तिकं तद्रसदारुमध्ये-
ऽलिन्दस्तथाग्रे कथितं द्विशालम् ।
हंसाख्यकं स्यादथ वर्द्धमानं
कीर्त्तिर्विनाशं भवनं चतुर्थम् ॥
अलिन्दयुग्मं पुरतो विदध्यात्
षड्दारु मध्येऽपि च शान्तसंज्ञम् ।
तस्माद्गृहे हर्षणवैपुले च
तथा चतुर्थं कथितं करालम् ॥
तस्मिन् गृहे दक्षिणतो ह्यलिन्दे
वित्तञ्च चित्तं धनकालदण्डे ।
वामे पुनर्बन्धुदपुत्रदं स्यात्
सर्व्वन्तु तस्मिन्नपि कालचक्रम् ॥
लघुश्च पश्चात् पुरतोऽपि युग्मं
स्याद्दक्षिणैको रसदारुमध्ये ।
तत्त्रैपुरं सुन्दरमेव नीलं
स्यात् कौटिलञ्चैव यथा क्रमेण ॥
प्रदक्षिणैकः पुरतोऽपि युग्मं
षट्कं गृहान्तः किल शाश्वदाख्यम् ।
ततो द्वितीयं खलु शास्त्रदं स्या-
च्छीलं तथा कोटरमेव संज्ञम् ॥
सौम्यं गृहं मण्डपसंयुतञ्च
तत्तुल्यरूपं विबुधैर्विधेयम् ।
सुभद्रमस्मादपि वर्द्धमानं
क्रूरञ्च सर्व्वेष्वशुभं चतुर्थम् ॥
मुखे त्रयं दक्षिणपश्चिमैकः
षड्दारुकं श्रीधरनामधेयम् ।
प्रोक्ते गृहे कामदपुष्टिदे च
चतुर्थकं कीर्त्तिविनाशमेव ॥
वामे तथा दक्षिणपश्चिमैको
युग्म मुखे मण्डपमग्रतश्च ।
श्रीभूषणं श्रीवसनं ततश्च
श्रीशोभकीर्त्तिक्षयमेव तद्वत् ॥
एकोऽपरे दक्षिणवामतश्च
यस्मब्यगं श्रीधरयुग्मपूर्व्वम् ।
सर्व्वार्थदं स्यान्मुखतस्त्रयश्चेत्
लक्ष्मीनिवासं कुपितञ्च नाम्ना ॥
युग्मं मुखे मण्डपमेव चाग्रे
युग्मं तथा दक्षिणतोऽन्तभित्तिः ।
पृष्ठे तु उद्योतकबाहुतेजः
सुतेज एवं कलहावहं स्यात् ॥
उद्योतके पश्चिमभागतो द्वौ
कुर्य्यात् द्विशालञ्च वह्निनिवासम् ।
तत् पुष्टिदं क्रोपसमानमन्त्य-
मनुक्तषट्कं क्रमतो विधेयम् ॥
लघुत्रिकं पूर्व्वदिशाविभागे
एको भवेद्दक्षिणवामपश्चात् ।
महान्तमेतन्महितञ्च दक्षं
कुलक्षयं मण्डपसंयुतं स्यात् ॥
भ्रमद्वयं दिक्त्रितये विभागे
मुखे त्रिकं मण्डपमग्रतश्च ।
प्रतापवर्द्धन्यमिदञ्च दिव्यं
सुखाधिकं सौख्यहरं चतुर्थम् ॥
तस्यैव रूपं रसदारुयुग्मं
पुनस्त्वलिन्दोऽजगजन्ततश्च ।
स्यात् सिंहनादं त्वथ हस्तियानं
श्रेयं तथा कण्टकमेतदन्त्यम् ॥
शान्तादिगेहानि च षोड़शैव
द्विशालकानीह यथाक्रमेण ।
नामानि चत्वार्य्यपि रूपमेकं
हस्त्यादिभेदैः क्रमतो विधेयम् ॥"

इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे एकद्विशालगृहलक्षणं ६ अध्यायः ॥*॥

"द्विशालगेहानि तु षोड़शैव
वास्तूदधेः सारतरं पुनश्च ।
वक्ष्याम्यलिन्दोऽपि पणो लघुश्च ।
द्वौ तिन्दुकाख्यौ कथितावलिन्दौ ॥
सूर्य्यं द्विशालं लघुरस्य वामे
मुखे त्रिकं दक्षिणतस्तथैकः ।
मुखे तथा वासवमेव गेहं
वामेऽपसव्ये लघुरेक एव ॥
प्रासादसंज्ञं मुखतस्त्रयश्चेत्
प्रदक्षिणं तिन्दुकवेष्टितं स्यात् ।
अलिन्दयुक्तं विमलं द्विशालं
तद्वीर्य्यवन्तं सह मण्डपेन ॥
अथ द्विशालेषु समस्तकेषु
मध्ये विदध्याद्रसदारु चैकम् ।
तदा भवेद्भासुरमग्रयुग्म-
मेको लघुर्दक्षिणदिग्विभागे ॥
एको लघुर्दक्षिणपूर्व्वगः स्यात्
तद्दुन्दुभाख्यं सुखमण्डपेन ।
द्वौ पूर्व्वतो दक्षिणतस्तथैको
युग्मं भवेन्मण्डपगं सुतेजः ॥
मुखे गुणा दक्षिणतस्तथैको
द्वौ मण्डपेऽस्मिन् हयजाभिधानम् ।
महान्तगेहं मुखजे त्रिके तु
युग्मान्वितं मण्डपमेतदेव ॥
मुखे तथा मण्डपके च युग्मं
वामेऽपसव्ये युगलं लघोश्च ।
लोकत्रयाड़म्बरमस्य नाम
षड़क्षरं शम्भुगणेशयोश्च ॥
युग्मं मुखे मण्डपगं द्वयं स्या-
त्तथा द्वयं दक्षिणवामतश्च ।
एको हि पश्चाद्वरदाभिधानं
श्रीविश्वकर्म्मोक्तमताद्द्विशालम् ॥
मालीनसंज्ञं मुखगैश्चतुर्भि-
र्युग्मं भवेद्दक्षिणवामभागे ।
युग्मं तथा पश्चिमदिग्विभागे
तस्याग्रतो मण्डप एक एव ॥
प्राग्शाभा लघशो विलासभवने वामे लघुर्दक्षिणे
तच्चेन्मण्डलसंयुतञ्च कमलं स्याद्वृद्धिदं सौख्य-
दम् ।
वेदास्तूदरके मुखे च सततं वामेक्षणे दक्षिणे
तस्याग्ने सुखमण्डपस्य फलदानेवं गृहान्
षोड़श ॥"

इति सूर्य्यादिषोड़शगृहाणि ॥*॥

"अथ त्रिशालं त्रिदशेक्षणैकं
स्यात्तै दशावासमरूपसंज्ञम् ।
तथा चतुर्थं कुमुदाभिधानं
हस्त्यादिभेदैः क्रमतो विधेयम् ॥
छत्रं ह्यलिन्दश्च तथैव पुत्रं
हरञ्च कामन्त्वथ कूर्म्मभद्रम् ।
षट्कञ्च मध्ये स्वधनं कुबेरं
पक्षं तथा कामदमेतदेव ॥
अलिन्दयुग्मं त्वथ भद्रयुक्तं
मध्ये कपाटं जलजाभिधानम् ।
स्यान्मेघजं चैव गजं क्षपञ्च
षड्दारु मध्ये सकले यथातः ॥
स्याद्वैजयं मण्डपकूर्म्मभद्रं
जयं निनादं त्वथ कीर्त्तिजञ्च ।
भद्रोनक्रस्याधिकसाकलाह्वं
निर्लोभकं वासदकौशले च ॥
त्रेयकं क्रमादीश्वरवारदाख्यं
भीमञ्च कौशल्यमतः क्रमेण ।
तद्वेद वृद्धसज्जनं तृतीयं
स्यात् कौशलं नीलमिदं चतुर्थम् ॥
मुखगुणलघुवामे दक्षिणे चैक एत-
द्वरदशरदमुक्तं दण्डकं काकपक्षम् ।
इदमिह हि निनादं मण्डपेनाधिकं स्या-
त्तदनु च गजनादं बाहुलं कीर्त्तिशाह्वम् ॥
स्पष्टादिरूपमुखमण्डपमेव सिंहं
श्रेये गृहे वृषगजे अपि कोशसंज्ञम् ।
वामेऽधिकश्च लघुना कथितं सुभद्रं
स्यान्माणिभद्रमपि रत्नजकाञ्चनाख्ये ॥
युगसुखमपरैको भैरवं दक्षिणे च
भरत नरजमेतत् स्याच्चतुर्थं कुबेरम् ।
पुनरपि लघु वामे हस्तियानं वियानं
हयजक्षपजगेहं तच्चतुर्थं क्रमेण ॥
वर्णानां शुभदञ्च सागरगृहं पश्चैव क्षस्मामुखे
प्रोक्तं चौरदरत्नदाह्वयमिदं कोलाहलञ्चापरम् ।
षड्दारुद्वयभद्रसप्तलघवस्तिर्य्यक् युतं शालया
गान्धर्व्वं क्षितिभूषणञ्च कथितं सर्व्वाङ्गकं दर्प-
कम् ॥
धान्यं वृद्धिकरं त्रिशालमुदितं शालां विना
पावनी
प्राक्शाला रहितं शुभं निगदितं पक्षेवमर्थ-
प्रदम् ।
चुल्लीसंज्ञमिदं करोति मरणं हीनं तथा
याम्यया
पश्चान्नं महिषीमृते च भवनं तत्पुत्रबन्धुक्षयम् ॥"

इति त्रिदशादिषोड़शगृहाणि ॥*॥